श्री देव्यथर्वशीर्षं

श्री देव्यथर्वशीर्षं

ॐ सर्वे वै देवा देवीमुपतस्थुः कासि त्वं महादेवीति ।। 1 ।।

साऽब्रवीदहं ब्रह्मस्वरूपिणी ।
मत्तः प्रकृतिपुरुषात्मकं जगत् ।
शून्यं चाशून्यं च ।। 2 ।।

अहमानंदानानंदौ ।
अहं विज्ञानाविज्ञाने ।
अहं ब्रह्माब्रह्मणि वेदितव्ये ।
अहं पंचभूतान्यपंचभूतानि ।
अहमखिलं जगत् ।। 3 ।।

वेदोऽहमवेदोऽहं ।
विद्याऽहमविद्याऽहं ।
अजाऽहमनजाऽहं ।
अधश्चोर्ध्वं च तिर्यक्चाहं ।। 4 ।।

अहं रुद्रेभिर्वसुभिश्चरामि ।
अहमादित्यैरुत विश्वदेवैः ।
अहं मित्रावरुणावुभौ बिभर्मि ।
अहमिंद्राग्नी अहमश्विनावुभौ ।। 5 ।।

अहं सोमं त्वष्टारं पूषणं भगं दधामि ।
अहं विष्णुमुरुक्रमं ब्रह्माणमुत प्रजापतिं दधामि ।। 6 ।।

अ॒हं द॑धामि॒ द्रवि॑णं ह॒विष्म॑ते सुप्रा॒व्ये3 यज॑मानाय सुन्व॒ते ।
अ॒हं राष्ट्री॑ स॒ oगम॑नी॒ वसू॑नां चिकि॒तुषी॑ प्रथ॒मा य॒ज्ञिया॑नां ।
अ॒हं सु॑वे पि॒तर॑मस्य मू॒र्धन्म॒म योनि॑र॒प्स्व॑न्तः स॑मु॒द्रे ।
य एवं वेद । स देवीं संपदमाप्नोति ।। 7 ।।

ते देवा अब्रुवन् –
नमो देव्यै महादेव्यै शिवायै सततं नमः |
नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्म तां || 8 ||

तामग्निवर्णाo तपसा ज्वलंतीं वैरोचनीं कर्मफलेषु जुष्टा”म् |
दुर्गां देवीं शरणं प्रपद्यामहेऽसुरान्नाशयित्र्यै ते नमः || 9 ||

(ऋ।वे।8।100।11)
देवीं वाचमजनयंत देवास्तां विश्वरूपाः पशवो वदंति |
सा नों मंद्रेषमूर्जo दुहांना धेनुर्वागस्मानुप सुष्टुतैतु || 10 ||

कालरात्रीं ब्रह्मस्तुतां वैष्णवीं स्कंदमातरं |
सरस्वतीमदितिं दक्षदुहितरं नमामः पावनां शिवां || 11 ||

महालक्ष्म्यै च विद्महे सर्वशक्त्यै च धीमहि |
तन्नो देवी प्रचोदयात् || 12 ||

अदितिर्ह्यजनिष्ट दक्ष या दुहिता तव |
तां देवा अन्वजायंत भद्रा अमृतबंधवः || 13 ||

कामो योनिः कमला वज्रपाणि-
र्गुहा हसा मातरिश्वाभ्रमिंद्रः |
पुनर्गुहा सकला मायया च
पुरूच्यैषा विश्वमातादिविद्यों || 14 ||

एषाऽऽत्मशक्तिः |
एषा विश्वमोहिनी |
पाशांकुशधनुर्बाणधरा |
एषा श्रीमहाविद्या |
य एवं वेद स शोकं तरति || 15 ||

नमस्ते अस्तु भगवति मातरस्मान्पाहि सर्वतः || 16 ||

सैषाष्टौ वसवः |
सैषैकादश रुद्राः |

सैषा द्वादशादित्याः |
सैषा विश्वेदेवाः सोमपा असोमपाश्च |
सैषा यातुधाना असुरा रक्षांसि पिशाचा यक्षा सिद्धाः |
सैषा सत्त्वरजस्तमांसि |
सैषा ब्रह्मविष्णुरुद्ररूपिणी |
सैषा प्रजापतींद्रमनवः |
सैषा ग्रहनक्षत्रज्योतींषि | कलाकाष्ठादिकालरूपिणी |
तामहं प्रणौमि नित्यं |
पापापहारिणीं देवीं भुक्तिमुक्तिप्रदायिनीं |
अनंतां विजयां शुद्धां शरण्यां शिवदां शिवां || 17 ||

वियदीकारसंयुक्तं वीतिहोत्रसमन्वितं |
अर्धेंदुलसितं देव्या बीजं सर्वार्थसाधकं || 18 ||

एवमेकाक्षरं ब्रह्म यतयः शुद्धचेतसः |
ध्यायंति परमानंदमया ज्ञानांबुराशयः || 19 ||

वाङ्माया ब्रह्मसूस्तस्मात् षष्ठं वक्त्रसमन्वितं |
सूर्योऽवामश्रोत्रबिंदुसंयुक्तष्टात्तृतीयकः |
नारायणेन सम्मिश्रो वायुश्चाधरयुक्ततः |
विच्चे नवार्णकोऽर्णः स्यान्महदानंददायकः || 20 ||

हृत्पुंडरीकमध्यस्थां प्रातःसूर्यसमप्रभां |
पाशांकुशधरां सौम्यां वरदाभयहस्तकां |
त्रिनेत्रां रक्तवसनां भक्तकामदुघां भजे || 21 ||

नमामि त्वां महादेवीं महाभयविनाशिनीं |
महादुर्गप्रशमनीं महाकारुण्यरूपिणीं || 22 ||

यस्याः स्वरूपं ब्रह्मादयो न जानंति तस्मादुच्यते अज्ञेया |
यस्या अंतो न लभ्यते तस्मादुच्यते अनंता |
यस्या लक्ष्यं नोपलक्ष्यते तस्मादुच्यते अलक्ष्या |
यस्या जननं नोपलभ्यते तस्मादुच्यते अजा |
एकैव सर्वत्र वर्तते तस्मादुच्यते एका |

एकैव विश्वरूपिणी तस्मादुच्यते नैका |
अत एवोच्यते अज्ञेयानंतालक्ष्याजैका नैकेति || 23 ||

मंत्राणां मातृका देवी शब्दानां ज्ञानरूपिणी |
ज्ञानानां चिन्मयातीता शून्यानां शून्यसाक्षिणी |
यस्याः परतरं नास्ति सैषा दुर्गा प्रकीर्तिता || 24 ||

तां दुर्गां दुर्गमां देवीं दुराचारविघातिनीं |
नमामि भवभीतोऽहं संसारार्णवतारिणीं || 25 ||

इदमथर्वशीर्षं योऽधीते स पंचाथर्वशीर्षजपफलमाप्नोति |
इदमथर्वशीर्षमज्ञात्वा योऽर्चां स्थापयति |
शतलक्षं प्रजप्त्वाऽपि सोऽर्चासिद्धिं न विंदति |
शतमष्टोत्तरं चास्य पुरश्चर्याविधिः स्मृतः |
दशवारं पठेद्यस्तु सद्यः पापैः प्रमुच्यते |
महादुर्गाणि तरति महादेव्याः प्रसादतः | 26 ||

सायमधीयानो दिवसकृतं पापं नाशयति |
प्रातरधीयानो रात्रिकृतं पापं नाशयति |
सायं प्रातः प्रयुंजानो अपापो भवति |
निशीथे तुरीयसंध्यायां जप्त्वा वाक्सिद्धिर्भवति |
नूतनायां प्रतिमायां जप्त्वा देवतासान्निध्यं भवति |
प्राणप्रतिष्ठायां जप्त्वा प्राणानां प्रतिष्ठा भवति |
भौमाश्विन्यां महादेवीसन्निधौ जप्त्वा महामृत्युं तरति |
स महामृत्युं तरति |
य एवं वेद |
इत्युपनिषत् || 27 ||

इति देव्यथर्वशीर्षं |